प्रारम्भ

START

Short Title Mahākālayogaśāstra : Khecarīvidyā

NEPAL-GERMAN MANUSCRIPT PRESERVATION PROJECT

~~Private~~ : KTM ~~KTNPH~~

Place of Deposit : Kaiser Library

Running No. S 69

Manuscript No. 316 विषय Yoga

TITLE (acc. to Colophon|Catalogeu) : Mahākālayogaśāstra : Khecarīvidyā/ Khecarī Vidyā

AUTHOR : Ādinātha

Reel No. C 32/12

No. of leaves : 17 compl. Size in cm : 23.1 X 10.5

Date of filming : 4.1.76 Script :- Devanag. - ~~Newari - Tibetan~~

Remarks : paper - ~~Thyasaphu - palm leaf~~ damaged by worms - rats - water - smoke

Retake C 86/6.

Date : NS Approx. 20th century
VS
Shaka

7 SEP 1976

खेचरीविद्या
पत्र पांका
अक्षर नागरी
नं. ३१८

खेचरीविद्याकथनं ७

॥खेच॥
॥१॥

श्रीगणेशाय नमः॥ ॥ॐ नमः शिवाय॥ ॥अथ देवी प्रवक्ष्यामि विद्यां खेचरिसंज्ञितां
॥ययाविज्ञातमात्रेणास्मैंलोकेस्मिन्ह्यजरामरः॥१॥ मृत्युव्याधिजराग्रस्तं दृष्ट्वा विश्वमिमं प्रिये।
बुद्धिं दृढतरां कृत्वा खेचरीं तु समाश्रयेत्॥२॥ जरामृत्युगदघ्नी या खेचरीं वेत्ति भूतले। ग्रंथ
तश्चार्थतश्चैव तदभ्यासप्रयोगतः॥३॥ तां सर्वभावेन गुरुं मत्वा तां व समाश्रयेत्। दुर्ल
भा खेचरी मुद्रा तन्मन्त्री वासाध्य दुर्लभा॥४॥ अभ्यासमेलकं चैव युगपन्नैव सिद्ध्यति। अभ्यास
मात्रनिरतो न विंदतीह मेलकं॥५॥ अभ्यासाल्लभते देवी जन्मजन्मांतरे क्वचित्। मेलकं ल
भते देवि योगे जन्मांतरे क्वचित्॥६॥ यदा तु मेलकं कामी लभते परमेश्वरि। तदा तत्सिद्धि
माप्नोति यदुक्तं शास्त्रसंततौ॥७॥ ग्रंथतश्चार्थतश्चैव मेलकं लभते यदा। तदा शिवत्वमा ॥राम॥
प्नोति निर्मुक्तः संसृतिप्रजात्॥८॥ शास्त्रं विना मत्ताबोद्धुं गुरवोपि न शक्नुयुः। तस्मात्सुदु ॥१॥

र्लभतरं लभ्यं शास्त्रमिदं प्रिये॥९॥ यावन्न लभ्यते ग्रंथं तावद्गां पर्यटेदिशाम्। यदा संलभ्यते
शास्त्रं तदा सिद्धिः करे स्थिता॥१०॥ न शास्त्रेण विना सिद्धिर्दृष्टा तेऽपि जगत्त्रये। तस्मान्मेलकदा
तारं शास्त्रदातारमीश्वरि॥१२॥ तदभ्यासप्रदातारं शिवं मत्वा सदा जपेत्। मंत्राश्च बह्वो
देवि मया प्रोक्ताः सुरार्चिते॥१३॥ न तेषु खेचरीसिद्धिराख्याता मृत्युनाशिनी। महाकालं च
मार्तंडं विवेकाख्यं च शोभनं॥१४॥ विशुद्धेश्वरसंज्ञं च तथा वै जालसंवरे। एतेषु मंत्रचर्येषु
तदभ्यासः प्रकाशितः॥१४॥ क्वचित्स्पष्टं तथास्पष्टं क्वचिन्मेलकाधिकं। अस्मिन्मंत्रवरे दिव्ये
मेलकादि प्रकाशितं॥१५॥ यदिह ज्ञेयं भवेत्किंचिद्दुर्ज्ञेया खेचरी मता। तत्तत्सर्वमिहास्माभिस्त
वशंत्साप्रकाशितं॥१६॥ तदशास्त्रं प्रलभ्येत यथोक्तमिदमद्भुतं। मन्मुखाद्गुरुहा ज्ञातं तथा
शास्त्रमिदं वदेत्॥१७॥ स चैव हि गुरुः सत्यमर्थतो वेत्ति यः पुनः। न वाधिकस्तमाख्यातो गुरु

॥खेप॥ नोमिलितंततोधिकः॥१८॥तु अस्माशास्त्रमिदंगुह्यमन्येषांनप्रकाशयेत्॥सुविचार्यप्रवक्तव्यमेवं
॥२॥ मार्गोपजीविनं॥१९॥य इदंपरमंशास्त्रंयत्रतत्रप्रकाशयेत्॥सशीघ्रंभक्ष्यतेद्देवियोगिनी
भिःशिवाज्ञया॥२०॥ग्रंथंसमर्पमेयस्यविनाकोलिकतर्पणं॥पूजितंशुभवस्त्रस्यादिव्यधू
पदुधूपितं॥२१॥स्थापयेद्विजनस्थानेयोगिनेयोगशालिने॥यस्मिन्नपूजितंशास्त्रमिदंति
ष्ठतिवैगृहे॥२२॥तत्राग्निस्तुमहारात्रिपीडाभवतिनिश्चितं॥यत्रेदंपूजितंग्रंथंगृहेतिष्ठति
पार्वती॥२३॥तत्रसर्वार्थदायिन्योवसंतेकुलदेवता॥तस्मात्सर्वप्रयत्नेनगोपनीयंविजान
ता॥२४॥तस्मिन्योगीसमयोक्तानिसंसिद्धिर्नसमीहते॥सयोगीसर्वभावेनगोपयेत्पुस्तकंत्वि
दम्॥२५॥स्वहंतस्यगुरुर्देवीयत्रास्तेपुस्तकंस्वयं॥गुरुणागुरुणांमहेशानिपुस्तकस्यतुरक्षणे ॥खेप॥
॥२६॥तस्यकष्टंचमयाशोक्तमिदानींखेचरींशृणु॥यत्रास्तिचागुरुर्देवीदिव्ययोगप्रसाधक ॥२॥

२७॥तत्रगत्वाचतेनोक्तंसंप्रदायत्रयंततः॥सम्यगभ्यासंपन्नेनकार्योचेतांत्रतंडिय॥२८
विद्यांचखेचरींदेविप्रवक्ष्येगणसिद्धिदाम्॥नतयारहितोयोगीखेचरीसिद्धिभाग्भवेत्
२९॥खेचर्याखेचरीयोग्याखेचरीबीजपूरया॥खेचराधिपतिर्भूत्वाखेचरेषुसदावसेत्
॥३०॥खेचरावसथंवह्निंसर्वांमंडलभूषिते॥व्याख्यातंखेचरीबीजंतेनयोगीससिद्ध्यति॥
॥३१॥सोमेशान्नवमंवर्णंप्रतिलोमेनचोद्धरेत्॥तस्मात्त्रिंशाक्षरंशास्त्रंमसरंचंद्ररूपकं॥३२
तस्मादथाष्टमंवर्णंचविलोमंपरमंप्रिये॥तस्मात्परमंमिन्नुक्तंचवादिरपिपंचमः॥३३॥इं
द्रोपिबिंदुसंभिन्नंकूटोयंपरिकीर्तितः॥गुरूपदेशलभ्यंचसर्वलोकप्रसिद्धिदं॥३४॥
यातस्यदेवयामायातद्रूपकरणाश्रयः॥स्वप्नेपिनभवेत्तस्यनित्यंद्वादशजाप्यत
३५॥य इमांपंचलक्षाणिजपेदपिसुयंत्रितः॥तस्यास्तिखेचरीसिद्धिःस्वयमेव

॥खेवि॥ प्रवर्त्तते ॥३६॥ न शांति सर्वविघ्नानि प्रसीदंते च देवताः। वलीपलितनाशं च भविष्यति
॥३॥ न संशयः ॥३७॥ एवं लब्ध्वा महाविद्यामभ्यासं कारयेत्ततः ॥ अन्यथा क्लिश्यते देवि न सिद्धि
खेचरीं विना ॥ ३८॥ यथाभ्यासविधौ विद्यां नालभेद्यः सुधामयीं ॥ ततः समेलकादौ च ल
ब्ध्वा विद्यां समुच्चरेत् ॥३९॥ अनया रहितो देवि न क्वचित्सिद्धिभाग्भवेत् ॥ यदेदं लभते शा
स्त्रं तदा विद्यां समाश्रयेत् ॥४०॥ ततस्तत्रोदितां सिद्धिमाशु तां लभते प्रिये ॥ तालुमूलं समुत्कृ
ष्य सप्तवासरमात्मवित् ॥४१॥ स्वगुरूक्तप्रकारेण मलं सर्वं विशोधयेत् ॥ स्नुहीपत्रनिभं
सर्वं सुतीक्ष्णं स्निग्धनिर्मलं ॥४२॥ समादाय ततस्तेन रोममात्रं समुच्छिनेत् ॥ छित्वा सैं
धवपथ्याभ्यां चूर्णिताभ्यां प्रदर्शयेत् ॥४३॥ पुनः सप्तदिने प्राप्ते रोममात्रं समुच्छिनेत् ॥राम॥
॥ एवं क्रमेण षण्मासं नित्यं संदर्शनात्प्रिये ॥४४॥ षण्मासाद्रसनामूलशिराबंधः प्रन ॥३॥

श्यति ॥ अथ वागीश्वरीधामशिरो वस्त्रेण वेष्टयेत् ॥४५॥ शनैरुत्कर्षयेद्योगी कालवेला
विधानवित् ॥ पुनः षण्मासमात्रेण नित्यं दर्शनात्प्रिये ॥४६॥ भ्रूमध्यावधि चाभ्येति तिर्य
क्कर्णबिलावधिः ॥ अधस्ताच्चिबुके मूलं प्रयाति क्रमचारिता ॥४७॥ पुनः संवत्सराणां तु तृती
याद्देव लीलया ॥ केशांतमूर्ध्वं क्रामति तिर्यक्शंखावधिः प्रिये ॥४८॥ अधस्तात्कंठकूपांतं पुन
र्वर्षत्रयेण तु ॥ ब्रह्मरंध्रांतमावृत्य तिष्ठत्यमरवंदिते ॥४९॥ तिर्यक्चूलितलं याति अथ क
र्णबिलावधि ॥ शनैः शनैर्मस्तकाच्च महावज्रकपाटभित् ॥५०॥ पूर्वं बीजान्विता विद्या वि
ख्याताति सुदुर्लभा ॥ तस्य षडंगं प्रकुर्वीत तया षट्स्वरभिन्नया ॥५१॥ कुर्यादेवं यथान्या
यं सर्वसिद्ध्याप्तहेतवे ॥ शनैरेवं प्रकर्तव्यमभ्यासं युगपन्न हि ॥५२॥ युगपद्यस्य वर्तेत त
स्य शरीरं विलयं व्रजेत् ॥ तस्माच्छनैः शनैः कार्यमभ्यासं वरवर्णिनि ॥५३॥ यदा च बाह्य

॥खे॰वि॰॥
॥४॥

मार्गेन जिह्वा ब्रह्मकिलं ब्रजेत्॥ तदा ब्रह्मार्गलं देवि दुर्भेद्यं त्रिदशैरपि॥५४॥ अंगुल्यग्रेण संघृ
ष्ट जिह्वामत्र निवेशयेत्॥ एवं वर्षत्रयं कृत्वा ब्रह्मद्वारं प्रविश्यति॥५५॥ ब्रह्मद्वारे प्रविष्टे तु
सम्यङ्मथनमाचरेत्॥ मथनेन विना केचित्साधयंति विचक्षणाः॥५६॥ खेचरीमंत्रसि
द्धिः स्यात्सिद्ध्यते मथनं विना॥ जपं च मथनं चैव कृत्वा शीघ्रफलं भवेत्॥५७॥ स्वर्णजां रौ
प्यजां वापि लोहजां वा शलाकिका॥ नियोज्य नासिकारंध्रे दृढस्निग्धेन तंतुना॥५८॥ प्रा
णान्निरुध्य हृदये दृढमासनसंस्थितः॥ शनैः संमथनं कार्यं भ्रूमध्ये न्यस्तचक्षुषा॥५९॥
षण्मासान्मथनावस्था तावतैव प्रजायते॥ सम्यक्संरुद्धजीवस्य योगिनस्तन्मनो यथा॥
६०॥ सुषुप्तिर्बालकानां च बालकानां यथा भवेत्॥ न सदा मथनं शस्तं मासे मासे समाच
रेत्॥६१॥ सदा रसनया देवि मार्गं तु परिसंक्रमेत्॥ एवं द्वादशवर्षे च संसिद्धिः परमेश्वरी ॥राम:॥
॥४॥

६२॥ शरीरे सकलं विश्वं पश्यत्यात्माविभेदतः॥ ब्रह्मांडेयं महामार्गे राजदंतोर्ध्वमंडले॥६३
॥ भ्रूमध्ये तं विजानीयात्त्रिकूटं सिद्धसेवितं॥ चणकांकुरसंकाशं तत्र संयोजयेन्मनः॥
६४॥ लिहन्रसनया तत्र स्रवंतं परमामृतं॥ शनैरभ्यासमार्गस्थः चतुर्वर्षं पिबेत्प्रिये॥
६५॥ वलीपलितनाशश्च संसिद्धिर्निश्चला भवेत्॥ सर्वशास्त्रार्थवेत्ता च जीवेद्वर्षसहस्रकं
६६॥ खनित्यादि महावादे रसवादादिसिद्धयः॥ पीत्वा पीत्वा विशेत्स्वस्थं खतस्या द्वाद
शाब्दकं॥६७॥ अनेनाभ्यासयोगेन वलीपलितवर्जितः॥ वज्रकायो महायोगी वर्षलक्षं प्र
जीवति॥६८॥ दशनागसहस्राणां बलेन सहितः प्रिये॥ स दूरदर्शनश्चैव दूरश्रवण एव
च॥६९॥ निग्रहानुग्रहे शक्तः सर्वत्र बलवान्भवेत्॥ एताश्च सिद्धयो देवि भ्रूमध्ये संभ
वंति हि॥७०॥ आकाशे रसनां कृत्वा दंतपंक्तिं निपीडयेत्॥ काकचंचुपुटं वक्त्रे कृत्वा

।। खेचरी ।।
।। ५ ।।

त्वा लदमृतं पिवेत् ।। ७१ ।। पोमा क्त्स रतः सत्यं जरामरण वर्जितः ।। खेचरत्वमवाप्नोति जीव
त्या चंद्रतारकं ।। ७२ ।। पादुका खड्ग वेताल सिद्धि द्रव्यमभीप्सितं ।। अंजनं विवरं चैव चेटकं यक्षि
णी तथा ।। ७३ ।। ये के चित्सिद्धसमयं विद्यंते भुवनत्रये ।। तत्सर्वमेव सहसा साधयेत्साधको
त्तमः ।। ७४ ।। इति श्री [illegible] आदिनाथेन [illegible] संवा
दे [illegible] ।। १ ।। [illegible] ।। यत्तज्जिकार्गलद्वारं दुर्विज्ञेयं महेश्वरि ।। कला चतु
ष्कं तत्रस्थं चतुर्वर्गात्मकं वरं ।। २ ।। पूर्वभाग कृता नाम राज्ञा दक्षिण गोचरा ।। दिवा पश्चि
म दिग्भागे परापरा शिवोत्तरे ।। तद्द्वारं रसनाग्रेण नासापूर्व कलाकृतं ।। यदा पिवति वै यो
गी मासार्धमधिपो भवेत् ।। ३ ।। यदा तु दक्षिणामृतं दक्षे योगी रसनया लिहेत् ।। मासार्धेन न सं
देहः साक्षादर्थेश्वरो भवेत् ।। ४ ।। पश्चिमं तु कला यांतमम्रतं जिह्वया पिवेत् ।। यदा तदा

।। राम ।।
।। ५ ।।

महायोगी मासात्कामेश्वरो भवेत् ।। ५ ।। उत्तरस्य कला या नाम मृतं चापि वे यदि ।। तदासौ सोम
मिश्रीनामाधिपत्यमवाप्नुयात् ।। ६ ।। तदोर्ध्व मंडलेलीनं ब्रह्मरंध्रं परामृतं ।। यदा सो पिवते
योगे जीवन्मुक्तः शिवो भवेत् ।। ७ ।। मासमासावधि यदा द्वादशाब्दं समाचरेत् ।। सर्व योगा
विनिर्मुक्तो सर्वसंपूर्णलक्षणः ।। ८ ।। जायते शिववद्योगी लोके स्मिन्नजरामरः ।। चतुष्कला
मृतं वारि पीत्वा पीत्वा महेश्वरी ।। ९ ।। ब्रह्मस्थाने स्थिता जिह्वा सनियोज्यामृतं पिवेत् ।।
सुस्वादु शीतलं हृद्यं क्षीरवर्णमफेनिलं ।। १० ।। मासमात्रप्रयोगेन जायते देववत्स्वयं ।। द्वि
मासे सर्वशास्त्रार्थसम्यग्ज्ञानाति पार्वती ।। ११ ।। स्वतंत्रं शिववन्मासत्रयाद्भवति वै शिवे ।। च
तुर्मासान्महेशानि सर्वज्ञत्वं प्रवर्तते ।। १२ ।। पंचमासे महासिद्धिस्त्रैलोक्यमपि पश्यति ।। ष
ण्मासे परमानंद गुणसद्भावपूजितः ।। १३ ।। जायते नात्र संदेहो जीवन्मुक्तः परापरे ।। सप्तमे

॥ खेचरी ॥
॥ ६ ॥

नमहाकायः पिशाचोरगराक्षसो ॥ १४ ॥ सहसंवत्सरेनित्यं खेचर्या दृष्टमानसः ॥ अष्ट
मेमासपर्याये देवसम्मीलनं भवेत् ॥ १५ ॥ नवमासे घटस्पर्शं सूक्ष्मत्वं चैवजायते ॥ दश
मे कार्यरूपत्वं सर्वलोकप्रकाशकं ॥ १६ ॥ एकादशेत्रिकालज्ञः सर्वलोकेश्वरप्रभुः ॥ जा
यते शिववद्विद्विजित्त्वमेतन्मयोदितं ॥ १७ ॥ यन्त्र शूलितलशक्तं केदारं शाङ्करीश्वरी ॥ तत्रसो
मकला सा च विख्याता वीरवंदिते ॥ १८ ॥ अमृताप्रथमा देवि द्वितीया मनवा स्मृता ॥ तुष्टि
श्चाथ चतुर्थी च रतिः षष्ठी वधृतिस्तथा ॥ १९ ॥ सा तमी नि चाष्टमी सर्वाः परामृतरसार्णवाः
॥ तदामाभिमुखं जिह्वाय दायोगी करोतिच ॥ २० ॥ अष्टधास्रवते तत्र तदा तु हिन संतति
रः ॥ तदा श्रुवनसंयोगे काले वराणक्षयः ॥ २१ ॥ अष्टभिर्मासवर्षाद्धि खेचरत्वं प्रजायते ॥
भ्रूमध्योर्ध्वं मया प्रोक्तं तत्सभोममंडलं ॥ २२ ॥ कलाचतुष्कं तचोक्तं परामृतनिकेतनं ॥ चंडि

॥ राम ॥
॥ ६ ॥

का नवकांतिश्च ज्योत्स्ना श्रीश्चेतिनामतः ॥ २३ ॥ तत्र जिह्वा समावेश्य पिबपीत्वा समाधिशेत्
द्विमासचतुष्केण जायते निरुपद्रवः ॥ २४ ॥ वज्रकायो भवेत्सत्यं सदा पावनपावनः ॥ तदू
र्ध्वं वज्रकंदाख्यं शिलाख्येच मंडलं ॥ २५ ॥ ललाटांते विजानीयात्तत्रदेवकलात्रयं ॥ प्रीतिस्त
थाङ्गजा पूर्णा तत्र जिह्वां प्रवेशयेत् ॥ २६ ॥ क्षीरधारामृतं शीतं स्रवंतं जिह्वया पिबेत् ॥
मासत्रयेण रोगेभ्यो विशि सर्वव्याधिवर्जितः ॥ २७ ॥ अभेद्यः सर्वशस्त्रौघै रभेद्यः सर्वलेपकैः ॥
अचिंत्यः सर्वविज्ञानैर्विरूपविषयान्वितः ॥ २८ ॥ भैरवांभो भवेत्सत्यं वज्रकंद प्रभावतः
नास्ति कायात रोद्धो ब्रीराजदंतं महापदं ॥ २९ ॥ तत्र पूर्णामहं देवि शीतलं चंकलाद
यं ॥ पूर्णा पिकुंभकावस्था रसनाग्रेण संस्पृशेत् ॥ ३० ॥ तत्र संजायते सत्यं सुरवदं शीत
लं जलं ॥ क्षुमवस्तत्र संयोज्य पिबेन्मासचतुष्टया ॥ ३१ ॥ अजरामरतामेति सर्वव्याधिविव

॥खेच०॥
॥७॥

र्जितः॥गुह्यबीजांकुरस्थानमाधारं परिकीर्तितं॥३२॥तत्र पंचकलाप्रोक्ता ब्रह्मलतत्परमा
मृतं॥सुधा सुधामयी प्रज्ञा कालग्री ज्ञानदायिनी॥३३॥कला पंच सधाराचक्रे कीर्तिताः सर्व
सिद्धिदा॥तत्रस्था परमा शक्तिरक्षा कुंडलिनी मिता॥३४॥तत्र कुंचनयोगेन कुंभकानि
गुणार्चिते॥स्थूलशक्तासमासाद्य तत्रस्थं शीतलामृतं॥३५॥सुषुम्नायां समासीनस्वाधि
ष्ठानादि पंकजान्॥तत्सुधारससंसिक्तं स्मरेद् ब्रह्मांडकार्यधीः॥३६॥तत्रस्थानेमृतं गुप्तं श
क्तिश्रीकुंडलीपरा॥सुषुम्ना मार्गमासाद्य ब्रह्मरंध्रमंतमायधी॥३७॥मूलपर्वकलाया
तासुधानत्रिपरिप्लुता॥आपादतलपर्यंतं व्याप्यं तीतत्स्मरेत्॥३८॥सुषुम्णा परमा
ह्लादविद्या चेति प्रकीर्त्तिता॥पूर्ववत्कुंभकावस्थां प्राप्य शक्तिं प्रबोध्य च॥३९॥नीत्वा
ब्रह्मांडपर्यंतं प्लावयेत्स्वस्वकातनुं॥योगी भिमासपर्याये पूर्वोक्तं लभते फलं॥४०॥ ॥राम॥ ॥७॥

गुह्यमेकांतरं यद्ध्वेणुदंडं तदुच्यते॥ कला चतुष्कं तत्प्रोक्तं परामृतरसात्मकं॥४१॥सु
शीता च परानंदा निःपवितप्लीवलिक्षया॥तत्र शक्तिं तु संबोध्य पूर्ववत्स्नावयेत्तनुं॥
४२॥चतुर्मासप्रयोगेन पूर्वोदितफलं लभेत्॥पिंगला रविवाहस्यादिडाख्या चंडवाहि
नी॥४३॥विषवाहस्तु रविवाहः सुधावाहो निशाकरः॥अभ्यासः सूर्यवाहाख्ये चंडवाहे च
शस्यते॥४४॥ नरक्षा चंद्रवाहे च योगी कुंभकमाचरेत्॥शशिवाहेन पवनं पूरयेत्तान्म न
सात्मना॥४५॥रविवाहेन योत्सर्गः शस्यते देहदुर्लभे॥एतत्ते व्याकृतं देवि कलास्थानच
तुगुणं॥४६॥अतः परं प्रवक्ष्यामि परामृतमहापथं॥वज्रकंदे ललाटे च प्रज्वलच्चंद्रस
निभे॥४७॥लांगलं चतुरस्रं च तत्र वादेव परः शिवः॥देवताः समुपासंते योगिन्यः शक्ति
संयुताः॥४८॥भूतितले महादेवि लक्षसूर्यसमप्रभं॥त्रिकोणमंडलं मध्ये देवं लिंगा

॥स्वेरी॥ ॥ ८॥

त्मकं शिवम्॥४९॥ [illegible]र्भयं मंदेवि [illegible]लिंगितं परं॥ देवतागण संयुक्तं भावये
त्परमेश्वरं॥५०॥ दक्षशाखे महाभागे वह्निकुंडलयान्विते॥ यं गर्भ धूम्रवर्णं च तत्र देवो
महेश्वरः॥५१॥ लिंगाकारं स्मरेद्देवि शिवसुक्तं गणावृतं॥ वामशाखे धर्वचंद्राभं सपद्मं
मंडलं शिवे॥५२॥ यगर्भं च तद्धं मध्ये तत्र लिंगं सुधामयं॥ गोक्षीरधवलाकारं शरत्सं
ड्युतप्रभं॥५३॥ स्वशक्तिसहितं सर्वं देवतागणसेवितं॥ एवं देवि चतुर्दिक्षु स्थाना
नुकानि वेमया॥५४॥ तेषां मध्ये महावृत्तं हगर्भं नत्व पार्वती॥ परेस्वरः परः शंभुः स्व
सितशक्तिसंस्थितः॥५५॥ लिंगाकारेण संयुक्तः सूर्यकोटिसमप्रभः॥ पृथिव्यधिपते
भीले पश्चिमे सूर्यनायकः॥५६॥ दक्षशाखे निलपतिर्वासे जलपतिः शिवे॥ मध्ये व्यो ॥ रामः ॥
मपतिस्थाने एते पंचमयोदिता॥५७॥ व्योमाधिपस्य देवस्य शिरोर्ध्वे च गुरंगुले ज्यो ॥ ८ ॥

तिर्मंडलमध्यस्थं कोटि[illegible]समप्रभम्॥५८॥ द्विमा[illegible]यं भांडमूलबंधकपाटकं॥ — — चंद्रम
हाशैलमध्ये [illegible]॥५९॥ शीतलामृतमध्ये तु विलीनं लिंगमीश्वरि॥ तस्येरंध्र प्रतीकाशं कोटि
चंद्रसमप्रभम्॥६०॥ [illegible]हियोपारे परहितमज्ञानं तिमिरापहं॥ अभीष्टं पंचस्थानि परंतत्वेपित
भ्यते॥६१॥ परामृतघटाधारकपालकुंभकान्वितं मनवस्तासहत्वाणी शीमूर्धं चक्रांप्रसास्यत॥
हस्त्यानिरुद्धप्राणसंचारी योगीरतनमार्गलं तालतालयोग्नाटये तत्वं संप्राप्य मनसा तहाँ॥६३॥
शिनेक्षुरसंकुल्या दंतसीरममृतं परं योगमार्गं न विवेयोगी दुर्लभं विबुधैरपि॥६४॥ ततसुधा तृप्ति
सत्प्रा परावस्था मुपेत्य च॥ तत्मयं नेत्रसंयोगलब्धाब्रह्मांडकानते॥६५॥ नादबिंदुमयं मां संयो
गी योगं न भक्ष्यते॥ एतद्रहस्यं देवेशि दुर्लभं परिकीर्तितं॥६६॥ सर्वज्ञेन शिवेनोक्तं सफलं शा
त्वसंनते॥ तत्सर्वं लभ्यते सम्यक् रम्या साचात्रसंशया॥६७॥ संप्राप्य सिद्धिसंपानं यो योगमि

॥खेचरी॥ समीश्वरि॥ न वेत्ति तस्य वक्त्रस्य न च सिद्धिर्[illegible]॥६७॥ न जानंति गुरुं देव शास्त्रोक्तः सम
॥९॥ याख्यथा॥ दंभकौटिल्यनिरता लोभांशा[illegible]॥६८॥ जिह्वामूले स्थिता देवी सर्वतेजोम
योऽनलः॥ तं चंद्रगलितं देवि शिवलिंगामेया[illegible]॥ तस्य भास्करश्चंद्रस्तालुमध्ये प्रतिष्ठितः
॥ एवं यो वेत्ति तत्त्वेन तस्य सिद्धिः प्रजायते॥[illegible] मंडले वह्नेः समुद्भोधप्रयत्नतः॥ पटु
संस्वं द्रवीभूतं तज्जलं चंद्रमंडले॥७२॥ भा[illegible]रसनेन समाश्रयेत्॥ तं चंद्रगलि
तं देवि शीतलं परमामृतं॥७३॥ नासिका[illegible]परिसंग्रहेत्॥ तेनाङ्गमर्दनात्स
त्यं नाडीशुद्धिः प्रजायते॥७४॥ गुदलिंगाद्[illegible]शरीरकं॥ कस्यामृतं च संलोड्य
ससतं चाधरारसः॥७५॥ तेनाङ्गमर्दनं[illegible]बलवाञ्जायते सम्यं वली ॥रामः॥
पलितवर्जितः॥७६॥ जिह्वामूलं च सन्मर्धतं[illegible]स्वदेहं मर्दयेन्नर्वरसेन वल्म ॥९॥

ग्रावतः॥७७॥ चतुरंगुलदृष्ट्या च जायते नात्र संशयः॥ उत्कर्ष्य रसनादूर्ध्वं दक्षिणाङ्गुलि
भिः शिवे॥७८॥ वामहस्ताङ्गुलीभिश्च घंटिकां स्फोटयेच्छिवे॥ मच्छित्वा पावकस्थान सूर्ध्व
वक्त्रशनैः शनैः॥७९॥ त्रिकूटोर्ध्वं चक्रांशे शिवस्थाने समाश्रयेत्॥ एषा ते खेचरी मुद्रा
कथिता मृत्युनाशिनी॥८०॥ एवमभ्यासशीलस्य न सिद्ध्यार्थभवंति हि॥ हमे रामश्च चत्वरोन
ट भेदस्तथैव च॥८१॥ स्वंगशो षष्ठधातनस्य कंडदेहविवर्णता॥ नाटस्य प्रशयोप्येते तेने बांश्चगु
च भेषजं॥८२॥ मनोनिर्विषयं कृत्वा त्रिमासमसरीरसे॥ देहमुद्धृते येन तेन देहवृद्धिः प्रजायते
॥८३॥ गतिर्वर्तिषकंकुत्पाद क्षिणाचोत तथैव च॥ रसमुद्धर्तमा मासे वज्रकरपत्रसुरवी॥८४॥
[illegible]लिहतस तंषधातस्य वनश्यति॥ तत्सुधा ममरीचाथ गृहीत्वा चाङ्गमर्दने॥८५॥
[illegible]शरीरविवर्णत्वं कंडुश्चापि प्रणश्यति॥ तटभेदश्च चत्वारोव हृधा शंसिता प्रिये॥८६॥ नि

॥खे॰वि॰॥ त्रेरागाकृशोथश्च दाहो भ्रांतिस्तथैव च ॥ भेदमेकं तथा प्रोक्तं द्वितीयमधुना शृणु ॥ ८७ ॥ दंत
॥१०॥ रुक्शूलशत्वं च वैकल्याय च नाशनं ॥ तृतीये भेदं च तथा शृणु देवि महाज्वरः ॥ ८८ ॥ शिरोरुजः श्ले
ष्मदोषचतुर्थं संप्रधावतां ॥ वमनं श्वासदोषश्च नेत्रांधत्वं प्रजायते ॥ ८९ ॥ दुर्जया च तथा नि
द्रा तीव्रा शृणु च भेषजम् ॥ समूलोद्घाससंभिन्ना मूर्ध्वं कुंडलिनीं नयेत् ॥ ९० ॥ निश्चलां मूर्ध्नि
गां कृत्वा भूत्वा कुंभकमाश्रयेत् ॥ शक्तिक्षोभान्महेशानि महानादः प्रवर्तते ॥ ९१ ॥ यदा शृणो
ति तं नादं तदा मुक्तः स उच्यते ॥ चिंतयेदमृतां शक्तिं स्वदेहे परमेश्वरि ॥ ९२ ॥ अनेन देवि मासे
न पूर्वदोषैः प्रमुच्यते ॥ अनेनैव विधानेन द्विमासं तु यदाचरेत् ॥ ९३ ॥ तदा शृणोति कर्णा
भ्यां महागजवरध्वनिम् ॥ पूर्ववच्चिंतयेद्देहं द्वितीयो मुच्यते गदैः ॥ ९४ ॥ त्रिमासं ब्रह्मनादं च शृ ॥रामः॥
णुयात् पूर्ववत्स्मरेत् ॥ तृतीयभेददोषेभ्यः मुच्यते नात्र संशयः ॥ ९५ ॥ मेघनादमपूरश्च ॥११॥

र्थे मासि श्रूयते ॥ श्रुत्वा पूर्ववदभ्यासे भ्रांतिदोषैः प्रमुच्यते ॥ ९६ ॥ एवं स्थिरमतिर्ध्यानमभ्यासं च
त्रिकालिकः ॥ साधयन् पंचमे तत्र संपंजायते ह्यजरामरः ॥ ९७ ॥ नवभेदेष्वनुष्कस्य न भेदश्च जा
यते ॥ निवारणं मया प्रोक्तं भूयः शृणु सुराधिपे ॥ ९८ ॥ यास्मिन्शांते पतिर्त्वं योगी योगेश्वरा
त्मके ॥ प्रविष्टः सर्वतत्त्वज्ञः तस्य पादान्नमाम्यहम् ॥ ९९ ॥ प्रथमं चालनं देवि द्वितीयं मथनं
भवेत् ॥ तृतीयं पीनमुद्दिष्टं चतुर्थं तु प्रवेशकं ॥ १०० ॥ तालुमूलं समुद्धृत्य जिह्वामुत्कर्षये
त्प्रिये ॥ चालनं तद्विजानीयात् त्रिमार्गागमभेदनं ॥ १ ॥ भेदनं न तु वदंतीस्म मथनं न तु नाप्रिये
लोहकीलप्रवेशनं यथा मथनमाचरेत् ॥ २ ॥ मथनं तद्विजानीयाद्योगी सिद्धिकरं भवेत् ॥ ३
त्रिमार्गगतमाकाशे जिह्वामूलं प्रसारयेत् ॥ ३ ॥ प्रवेशश्च द्वारदेशानि योगसिद्धिप्रवर्तकः ॥ ब्रह्मार्ग
लप्रवेशे न जिह्वासंक्रमणेन च ॥ ४ ॥ प्रत्ययपरमेश्वानि क्षणात्तत्संप्रजायते ॥ प्रसादानंदभा

॥खे॰ री॰॥ ॥११॥ वित्वं निद्राहारं ततः परं ॥५॥ संगमभोजनं देवि स्वल्पमात्रं प्रजायते ॥ पुष्टिः संजायते तेजो देहवृद्धि
र्भविष्यति ॥६॥ न जरा न च मृत्युश्च न आधिः पलितानि च ॥ ऊर्ध्वरेता महेशानि अणिमादि समन्वितः
॥७॥ यदि निश्चलभावेन योगमेतत् प्रसाधयेत् ॥ यद्यप्रोक्तानि मान्त स्प लभते काम पार्वती ॥८॥ जि
ह्वाग्रे श्री स्ववागीशी संस्थिता वीरवंदिते ॥ जिह्वामूलाधारभागे बंधमृत्यु प्रतिष्ठिता ॥९॥ बंधमृ
त्यु प्रदं सर्वं मूलं मूलगुरुणा कृते ॥ तदग्रेण विशेत् सोमधाम श्री शंभुसंज्ञिकं ॥१०॥ अनेन
देवि योगेन मनसा साधितेन च ॥ उन्मनी वशमायाति योगी तल्लयमाप्नुयात् ॥११॥ लय
नाम स्मयः सद्यः सोपि वेत्ति विचारतः ॥ जिह्वाग्रे मनसा ध्यायन् दशधातमलक्षये ॥१२॥ मूला
त्सुषुम्ना मार्गेण पवनं चोर्ध्वं चालयेत् ॥ ब्रह्मध्यानगते योगी मनः शून्ये निवेशयेत् ॥१३॥ ध्याये ॥राम:॥
द्विपरं तत्त्वं हेयोपादेयवर्जितं ॥ आकाशं गंगास्रवति ब्रह्मस्थानात् सुशीतलं ॥१४॥ यः पिबे ॥११॥

न्मासत्रयेण वज्रकायो भवेद्ध्रुवं ॥ दिव्यदेहो भवेत् तत्र दिव्यकायावदर्शनं ॥१५॥ दिव्यबुद्धिर्भवेत्त
स्य दिव्यश्रवणमेव च ॥ जिह्वाग्रे कोटि चंद्राभां वागीश्रीं प्रतिभावयेत् ॥१६॥ परामृत कलानत प्राक
वित्वं लभते क्षणात् ॥ जिह्वाग्रे संस्थिता लक्ष्मी परामृत विमोहिता ॥१७॥ ध्यायन् योगी महेशानि
योग साम्राज्य माप्नुयात् ॥ सहजा पंच विख्याता पिंडस्मिन् परमांतिके ॥१८॥ यदा संजायते देहा मा
तृदेहे पितृक्षयात् ॥ तत्तस्यार्धं भवंति स्म देहवृद्धिमुपेयुषि ॥१९॥ आद्या कुंडलिनी शक्तिः सह
जा प्रथमा स्मृता ॥ द्वितीया तु सुषुम्ना स्यात् जिह्वा चैव तृतीयका ॥२०॥ तालुस्थानं वज्रथं स्या
च्चतुर्थं वज्रपंचमं ॥ तन्निडं सहजा माया द्वितीये सहजे न्यसेत् ॥२१॥ तृतीयां सहजां मूर्ध्वं च
तुर्थं सहजे विशेत् ॥ चतुर्थं सहजं भित्त्वा सहजं पंचमं विशेत् ॥२२॥ एतद् इदं मया प्रोक्तं पिंडविशे
यं फले स्वरी ॥ गोपनीया प्रयत्नेन न देया यस्य कस्यचित् ॥२३॥ इति श्री महा आदिनाथे

॥खे॰वि॰॥
॥७२॥

न[illegible]महाकालयोगशास्त्रे उमामहेश्वरसंवादे खेचर्यां विद्यायां द्वितीयः पटलः ॥२॥ मूलकुंड
लिनाशक्तिं सुषुम्नामार्गमागतं स्थाल्ये तेकतं तु प्रतिमां सूर्यकोटिसमप्रभां ।१। प्रविश्य घंटि
कामार्गे शिवद्वारार्गलां शिवां भित्वा ऽसंतथा योगी कुंभकेन महेश्वरि ॥२॥ प्रविशेत्कोटिसू
र्याभां धाम स्वयंभु विप्रिये। तत्र मत्तमहांभोधौ शिवकल्लोलशालिनी ॥३॥ पीत्वा विश्रम्य च स्व
धां परमानंदपूर्णया। उआत्तत्त्वधया रस्यमात्मदेहं तु भावयेत् ॥४॥ अनेन दिव्ययोगेन जाय
ते दिव्यदर्शनं। खेचरत्वं भवेत्तस्य सर्वरोगक्षयस्तथा ॥५॥ वंचनं कालमृत्यूनां त्रैलोक्यभ्रमणं तथा
॥ अणिमादिगुणोपेतः संसिद्धाजायते ध्रुवं ।६। योगेंद्र तत्त्वमाप्नोति मम पर व्याहता भवेत् स्थान
वनागसहस्राणां वलेनसहितः स्वयं ॥७॥ जायते शिवपदे पि सत्यं सत्यं मयोदितं । इडापिंगलयो ॥खे॰॥
र्मध्ये सुषुम्ना ज्योतिरूपिणी ॥८॥ वर्णरूपगुणैः पूर्णालिवसन्नविदालस्या प्रसुप्ता भुजगाकारा ॥७२॥

सा कुंडलिनी परा ॥९॥ गंगा च यमुना चैव इडापिंगलसंज्ञिका। गंगायमुनयोर्मध्ये तां शक्तिं संनि-
वेशयेत् ।१०। वृसबधामाविधिशिवे परमामृतरूपिणी। तन्मयो जायते सत्यं सद्य मत्तनुः स्वयं ॥
११॥ शिवं धाम गतो शक्तिः परमेशात्स्वदर्पं तज्जोगतन्त्रिसंतप्ता परमानंदपूरिता ।१२। संचिंत्य
योगिनो देहमापादतलमस्तकं। आस्थस्था शशिरश्मिस्था शीतला परमेश्वरि ।१३। पुनस्तेनैव
मार्गेण प्रजा – ति – स्वयं प्रिये। एतद्रहस्यमाख्यातं योगयोगेंद्रवंदिता मृ ।१४। अतस्तु पसर्वस्मा
स्वाणि जपहोमादिकर्मच। धर्माधर्मविनिर्मुक्तो योगी योगं समभ्यसेत् ।१५। रसनामूर्ध्वगां कृत्वा
त्रिकूटे संनिवेशयेत्। ब्रह्मांडे ब्रह्मरंध्रां गं राजदंतोर्ध्वमंडले ।१६। त्रिकूटं तं विजानीयात्त्रिलिंगंस
ममुज्वलं। कालकर्मविनिर्मुक्तो उर्ध्वजीयं सुसंदीपि ।१७। इडायां रात्रिरुद्दिष्टा पिंगलायमहस्मतं
। चंद्रादित्यो स्थितौ देवि नित्यं रात्रिंदिवात्मकौ ।१८। न दिवा पूजयेल्लिंगं रात्रौ चैव न पूजयेत्। सततं

॥रवि॰ ती॥ ॥१३॥

मूजये च्छिंगं दिवा रात्रिनिरोधतः ॥१९॥ अहोरात्रिमयं देवं कालकर्मस्वभावजं ॥ कालकर्मनि
रोधेन कालमृत्युपथा भवेत् ॥२०॥ कालधर्मविनिर्मुक्तो चिंतयेदात्मनमव्ययम् ॥ पूजयेच्चावघेष्य
शान्तपर्यन्तं कलामृतम् ॥२१॥ एवं षण्मासयोगेन जायते ह्यजरामरः ॥ सर्वज्ञत्वं भवेच्चित्तस्य शिवस्यास्य
निरामयः ॥२२॥ तालुमूले समाविश्य रसना मूर्ध्नि चक्रगा ॥ तत्रस्थान्ना स्वधा पीत्वा सीत्कारेण शनैः शनैः
॥२३॥ प्रपिबेत्सततं योगी निरालंबपदे शिवे ॥ मनः संयोज्य योनामासहजं योगमाचरेत् ॥२४॥ अ
नेन योग षण्मासे जायते ह्यजरामरः ॥ चिबुकं च जपेद्देवि षोडशस्वरमंडलं ॥२५॥ भ्रूमध्ये च सु
षीम्नस्य जिह्वा मूर्ध्नि प्रसारयेत् ॥ संप्राप्य कुंभकावस्था मिडापिंगलरोधनी ॥२६॥ मूले शक्तिः स
मुद्बोध्य नीत्वा षट्सरसीरुहान् ॥ तडित्कोटि संकाशं ब्रह्मांडोदरमध्यगम् ॥२७॥ ध्यानाच्छी
तामृतं भोधौ संनिवेश्य चिरं विशेत् ॥ यदा ब्रह्ममयो धाम्नि योगः सर्वत्र लीलया ॥२८॥ यदा

॥राम॥ ॥१३॥

निर्जीवव देहे भाति सूर्यमितमखंडेनाते न देवयोगेन सम्यक्रमाचरेत् ॥२९॥ यदा न दासं भ
वति ... ॥ ... ते जीवे दा वृद्धतारकं ॥३०॥ यदा ब्रह्मपुरं भित्वा योग
ति लीलया ॥ तदा चित्तत्वमाप्नोति निर्मले हृमि मंशिवे ॥३१॥ न पुनः पिबति मातुः स्तनो संसा
रचक्रके ॥ यदा तु वायुमनो बुद्धिस्तं कंठे हृमिमं भवेत् ॥३२॥ तदास्थिरज्ञाते भूत्वा मूलाद्धमि
तमुज्ज्वला ॥ कोटिसूर्यप्रतीकाशं भावयेच्चिरमात्मवित् ॥३३॥ आपादतलपर्यंतं प्रसृतं जीव
मात्मनि ॥ संहृत्य क्रमयोगेन मूलाधारपदं नयेत् ॥३४॥ तत्र कुंडलिनी शक्तिः सर्वज्ञानिलसं
निभा ॥ जित्वानिलं वह्निमाणिग्रसं तं चिंतयेद्धिया ॥३५॥ संप्राप्य कुंभकावस्था तया द्वलय
भाकुरं ॥ मूलमूर्तीयं देवेशि स्वाधिष्ठानपदं नयेत् ॥३६॥ तत्रस्थं जीवमखिलं प्रसंती चिंत
येज्जितो ॥ तडित्कोटिप्रतीकाशं तस्मादुत्तियमत्वरम् ॥३७॥ मणिपूरपदं प्राप्य तत्र पूर्वव

॥खे॰ री॰॥
॥१४॥

द्वाचेरवा॥ समुत्तीर्य पुनस्तस्मादनाहतपदं नयेत् ॥ ३८ ॥ तत्रा स्थित्वाक्षरो देवि पूर्ववर्गस्व
तास्मरेत् ॥ चिंताध्यस्त्पुनः पार्श्वे षोडशारं निवेशयेत् ॥ ३९ ॥ तत्रापि चिंतयेद्देवि पूर्ववद्योगि
मार्गवित् ॥ तस्मादुत्तीर्य सुसर्पणीणा जीवं न्यसेत्पुनः ॥ ४० ॥ अग्रतं जीवं महेशानि कोटिसूर्य
समप्रभं ॥ मनसा सह वाणी शक्तीनावृत्यार्गलं धरणानां ॥ ४१ ॥ पराम् तमहावोधविद्यामं
सम्पारोचवेत्त ॥ तत्रस्थाय महेशि शिवं परमकारणं ॥ ४२ ॥ शात्वा सह समायोज्य तयोरैक्य
विभावयेत् ॥ स्वदिक्ष्विस्म धूतकालकालवित् ॥ ४३ ॥ यावद्रुजंति न कालत्वावत्तत्समं
स्ववशं तु ॥ तस्मात् स्वपदं देवि न हि कालप्रयोजनं ॥ ४४ ॥ ब्रह्मरार्गलस्था देहे हलक्षण
योजना ॥ स्वदि स्थमान्वतः कालव्याविर्णीतेषां पपद्यति ॥ ४५ ॥ तदा स्वक्ष्माग्र्गलं भित्त्वा शक्तिमूलपद ॥राम॰॥
दं नयेत् ॥ शक्तिदेहस्य च तु [illegible] शिवः समं [illegible] ॥ ४६ ॥ ततो [illegible] मूलपदं नयेद्भक्तिदेह ॥१४॥

स्य प्रश्नत्तं ॥ स्वजीवचेंद्रियैः सह तत्रकालसमागतः ॥ ४७ ॥ यदि मानुष्यकं देहं त्यक्तुमिच्छा
प्रवर्तते ॥ ततः परमसंतुष्टो ब्रह्मस्थानं परं शिवा ॥ ४८ ॥ शक्त्या संयोज्य निर्भिद्य योगब्रह्मशिवं
ब्रजेत् ॥ व्योमतत्त्वमहायोनि वायुतत्त्वमहानिले ॥ ४९ ॥ तेजस्तत्त्वमहातेजो यस्य तत्त्वं जलमंडले
मही तत्त्वं महाभागे निरालंबे मनः परं ॥ ५० ॥ व्योमादि गुण तत्त्वेषु चेंद्रियानि निवेशयेत् ॥ ए
वं संस्थाक्रम्य कापटं तत्त्वविलं वकः ॥ ५१ ॥ अष्टपंचभूतायैर्भित्त्वा सूर्यस्य मंडले ॥ परं तत्त्वपदे
शांते शिवे लीनः शिवायते ॥ ५२ ॥ न कोटिकल्पसाहस्रैः पुनः संवर्तनं भवेत् ॥ अनुग्रहाय लो
कानां यदि देहं न संत्यजेत् ॥ ५३ ॥ प्रलयांते तनुं त्यक्त्वा मात्मन्येवावतिष्ठते ॥ इत्येवं खेचरीमुद्रा
खेचराधिपतिस्तथा ॥ ५४ ॥ जन्ममृत्युजरारोगावलीपलितनाशिनी ॥ अनया सदृशी विद्या क्वचि
च्छास्त्रांतरे न हि ॥ ५५ ॥ खेचरीमेलनं देवि सुगुप्तं तत्प्रकाशितं ॥ खेचर्यां तु समा देवि सर्वेषा

।।खे॰ २।।
।।१५।।

गेन्द्र वंदिते ।। ५६ ।। तां न यो वेत्ति लोकेस्मिन्स पशुः प्रोच्यते शिवे ।। नित्यमभ्यासशीलस्य
प्रदत्तोपि जगत्त्रये ।। ५७ ।। गुरुवक्त्राच्च संलभ्य विद्यथाभ्यासतोपि वा ।। खेचरीमेलकाद्ये
षु - - - निसंसक्तचेतसः ।। ५८ ।। न सिद्ध्यन्ति महायोगी मदीयाराधनं विना ।। मत्प्रसाद
विहीनानां मन्निंदापरचेतसाम् ।। ५९ ।। पशूनां पाशबद्धानां योगः क्लेशाय जायते ।। सर्व
ज्ञेन शिवेनोक्तं पूजासंत्यज्य मामकीम् ।। ६० ।। पूजितः सततं देवि योगो नाशाय जायते
।। भक्त्या संजायते देवि सर्वलोकमयं शिवं ।। ६१ ।। मद्भक्तानासक्तचित्तस्य तुष्यंति सर्वदेव
ता ।। ६२ ।। अन्यथा क्लेश एव स्यान्न सिद्धिर्जन्मकोटिभिः ।। सर्वे सिद्ध्यंति मंत्राश्च योगाश्च
परमेश्वरी ।। ६३ ।। सदाराधनशीलस्य मद्भक्तानासक्तचेतसः तस्मात्संपूजयेद्देवि सर्वयोगा
भिवृद्धये ।। ६४ ।। खेचर्यानंदितो योगी योगं युंजीत तन्मयम् ।। विजनेयं जंतुरहितो सर्वोपद्र ।।राम।।
।।१५।।

ववर्जितः ।। ६५ ।। सर्वसाधनसंयुक्तः सर्वचिंताविवर्जितः ।। मृद्वासने समास्थाय यत्त्वगु
रूक्तप्रकाशितः ।। ६६ ।। कुर्याद्वैकैकमभ्यासं गुरुमार्गावलंबकः ।। तव प्रीत्या महेशा
नि किं भूयः श्रोतुमिच्छसि ।। ६७ ।। श्रीदेव्युवाच ।। शंभोः सद्भक्तिसंलभ्य जयं चंद्रक
खेचरी ।। त्वया श्री खेचरी विद्या गुह्या सा च निरूपिता ।। ६८ ।। ।। इति श्रीमहाकालादि
नाथेन निरूपिते महाकालयोगशास्त्रे [illegible] संवादे [illegible] खेचरी विद्यायां तृतीयः प
टलः ।। ३ ।। अथातः संप्रवक्ष्यामि गुटिकौषधयानि च ।। औषधेन विना योगं न क
श्चित्सिद्धिमाप्स्यति ।। १ ।। [illegible]
[illegible]
[illegible]

॥ वैरा ॥ ॥ १८ ॥

[illegible]गेन घृतेन पानमात्र [illegible] दन्तस्त्रवयुतं भवेत् ॥ [illegible] जीवेत्भाव
[illegible]ली दृता र ॥ ४ ॥ वाराही [illegible] चूर्णघृत [illegible] ॥ ५ ॥ तिलमाषशर्क
रा [illegible] सर्पि [illegible] रामा समान्न प्रयोगेन [illegible] भेत ॥ ५ ॥ [illegible] पत्र [illegible] सेन प्र
पतेमरनाश्रियो [illegible] धकं त्रिफला [illegible] मधुरत्रयसंमिश्रितं ॥ ६ ॥ भक्षये [illegible]
रामा [illegible] लिता [illegible] ॥ पा [illegible] गंधकं [illegible] विता [illegible] ॥ ७ ॥ [illegible]
[illegible] मज [illegible] ॥ त्रिमधुयुतमा [illegible] भवेत् ॥ ८ ॥ भृ
गं [illegible] मूलं परिशोध्य चूर्ण [illegible] लनिलं चामलकं दधि च ॥ मधुत्रयेण [illegible] मार
निर्व्याधींपरो गात नजरा नमृत्यु ॥ ९ ॥ निर्गुंडीपत्रमेकैकं [illegible] कालं परि भक्षयेन्नरः ॥ [illegible] ॥ राम: ॥
दश [illegible] द्वे [illegible] नरो [illegible] रोगवर्जितः ॥ १० ॥ निर्गुंडी [illegible] सा [illegible] समाधयेत् [illegible] ॥ १८ ॥

॥ वैरा ॥ ॥ १९ ॥

शर्कराघृतमध्वंकैर्वस्त्रपलितापहम् ॥ ११ ॥ षण्मासं गंधकं स्वर्णं तिलकं रुद्रलोच
नं ॥ मधुरत्रययुतं चूर्णमजरामरपदप्रदम् ॥ १२ ॥ रसशाल्मलिनिर्यासं गंधकं मधु
रत्रयैः ॥ भक्षयेत्प्रातरुत्थाय षण्मासादजरामरः ॥ १३ ॥ ॥ इति श्रीमहाआदिनाथे
ननिरूपिते महाकालयोगशास्त्रे खेचर्याविद्यायां मोक्षधर्मयोगो नाम चतुर्थः पट
लः ॥ ४ ॥ समाप्ता ॥ शुभम् ॥ ० ॥

॥ राम: ॥ ॥ १९ ॥

Short Title Mahākālayogaśāstra: Khecarīvidyā

NEPAL-GERMAN MANUSCRIPT PRESERVATION PROJECT

Place of Deposit : Kaiser Library ~~Private~~ : KTM/~~PTN/BH~~

Manuscript No. 316 विषय Yoga. Running No. 8 ~~6~~9

TITLE (acc. to Colophon/Catalogeu) : Mahākālayogaśāstra : Khecarīvidyā/ Khecarī Vidyā

AUTHOR : Ādinātha

No. of leaves : 17 ■compl. Size in cm : 23.1 X 10.5 Reel No. C 32/12

Date of filming : 4.1.76 Script :- Devanag. - ~~Newari - Tibetan~~

Remarks : paper - ~~Thyasaphu - palm leaf~~, damaged/by worms - rats - water - smoke

Date : NS Approx. 20th century
VS
Shaka

Retake C 86/6.

17 SEP 1976